# Shri Ganesha Stuti Parasharakrita

# પરાશરકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Parasharakrita

File name : gaNeshastutiHparAsharakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 30 | 2.30 26-37||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# પરાશરકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
પરાશર ઉવાચ ।
નમસ્તે ગજવક્ત્રાય નરાકારાય તે નમઃ ।
નરકુઞ્જરરૂપાય ગણેશાય નમો નમઃ ॥ ૨૬॥
નિર્ગુણાય ગુણાધારરૂપિણે પરમાત્મને ।
પરાત્પરાય દેવાયાનાદિસિદ્ધાય તે નમઃ ॥ ૨૭॥
અનન્તાનનધારાયાનન્તપાણ્યઙ્ઘ્રિરૂપિણે ।
અનન્તવિભવાયૈવ ગકારાય ચ તે નમઃ ॥ ૨૮॥
સર્વહીનાય દેવાય માયાભ્યાં વર્જિતાય તે ।
સદા બ્રહ્મમયાયૈવ ણકારાય નમો નમઃ ॥ ૨૯॥
તયોશ્ચ સ્વામિને તુભ્યં ગણેશાય નમો નમઃ ।
સ્વાનન્દવાસિને પૂર્ણભુક્તિમુક્તિપ્રદાય તે ॥ ૩૦॥
કિં સ્તૌમિ દેવદેવેશ વેદવેદાન્તકાદિભિઃ ।
સમ્પાદિતં પરં બ્રહ્મ ત્વામતઃ પ્રણમામ્યહમ્ ॥ ૩૧॥
યદિ તુષ્ટોઽસિ દેવેશ તદા પુત્રો ભવ પ્રભો ।
આવયોર્ગણનાથ ત્વં તદા મે સ્યાત્ સ્થિરં મનઃ ॥ ૩૨॥
અસ્માકં કુલદેવશ્ચ ત્વમેવ ગણનાયક ।
બ્રહ્મભાવેન નિત્યં ત્વાં ભજામસ્તત્ર વિઘ્નપ ॥ ૩૩॥
પુત્રભાવેન દેવેશ ભજેયં સંસૃતૌ ગતઃ ।
સંસારઃ સફલસ્તેન બ્રહ્મરૂપો ભવેચ્ચ મે ॥ ૩૪॥
શ્રુત્વૈવં વચનં તસ્ય પરાશરમુનેરિદમ્ ।
તમુવાચ ગણાધીશો ભક્તં યોગધરં પરમ્ ॥ ૩૫॥
(ફલશ્રુતિઃ)
ગણેશ ઉવાચ ।
ત્વયા યત્પ્રાર્થિતં વિપ્ર તત્સર્વં સફલં ભવેત્ ।

તવ પુત્રો ભવિષ્યામિ ગજાસુરવધાય ચ ॥ ૩૬॥
ત્વયા સ્તોત્રં કૃતં યચ્ચ તત્સર્વેચ્છિતદં ભવેત્ ।
ભુક્તિમુક્તિકરં તેષાં પઠતાં શ‍ૃણ્વતાં નૃણામ્ ॥ ૩૭॥

ઇતિ પરાશરકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૩૦ । ૨.૩૦ ૨૬-૩૭॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 30 . 2.30 26-37..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Parasharakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*